विषय - संस्कृत, बी॰ए॰ स्नातक (प्रतिष्ठा)
द्वितीय वर्ष, तृतीय पत्र
शिवराज विजय - प्रथम निःश्वास

डॉ॰ ओम प्रकाश आर्य
महाराजा कॉलेज, आरा
दिनांक - 26|09|2020

गद्यांश व्याख्या

अहो चिररात्राय सुप्तोऽहम, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः सन्ध्योपासनसमयोऽयमस्मद् गुरुचरणानाम्, तत्सपदि अवचिनोमि कुसुमानि इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्तुमारेभे ।

भावार्थ -

अरे! मैं बहुत देर तक सोता रहा, निद्रा रूपी जाल में फँसकर मैंने अत्यन्त पुण्यमय समय व्यर्थ गवां दिया। यह हमारे पूज्य गुरुदेव के सन्ध्योपासना का समय है, इसलिए शीघ्र ही फूल चुन लाता हूँ। इस प्रकार सोचता हुआ वह ब्राह्मण बालक केले के पत्ते को मोड़कर, तिनकों के टुकड़े से जोड़कर, दोना बनाकर फूलों को चुनना आरम्भ किया।

संस्कृत व्याख्या -

अहो = आश्चर्यम, अहं = विप्र बटुः, चिररात्राय = चिरम, सुप्तः = प्रसुप्तः। स्वप्नजालपरतन्त्रेणैव = स्वप्नः संदेशः स एव जालः आनायः, तत्परतन्त्रेण तदा- यत्न, पुण्यमयः = सुकृतयुक्तः, समयः =

कालः, अतिवाहितः = व्यतीतः, अस्मद्-गुरुचरणानाम् = अस्माकं गुरूणाम्, अयम् = एषः, सन्ध्योपासनसमयः = सन्ध्योपासन-कालः, तत्सपदि = तस्मात् सत्वरम्, कुसुमानि = प्रसूनानि, अवचिनोमि = सङ्कलयामि, इति = एवं, चिन्तयन् = विचारयन्, एकं कदलीदलम् = एकं रम्भापत्रम्, आकुञ्च्य = भग्नं कृत्वा, तृणशकलैः = तृणखण्डैः, सन्धाय = सम्मेल्य, पुटकं विधाय = सम्पुटं कृत्वा, पुष्पावचयं = कुसुमसंग्रहम्, कर्तुम् = विधातुम्, आरेभे = समारब्धवान्।

~~पदव्या~~

पदव्याख्या -

स्वप्नजालपरतन्त्रेण = स्वप्न एव जालम् तस्य परतन्त्रेण (तत्पुरुष), सुप्तः = स्वप् + क्त, पुण्यमयः = पुण्य + मयट्, अवचिनोमि = अव + चि + लट् उ०पु० ए०। आकुञ्च्य = आ + कुञ्च् + ल्यप् तृणशकलैः = तृणानां शकलानि तैः, आरेभे = आङ् + रम्भ + लिट् उ०पु०ए०।

विशेष -

स्मृतियों के अनुसार ब्रह्मचारी को सूर्योदय से पूर्व प्रातः और सूर्यास्त से पूर्व सायंकृत्य कर लेना चाहिए। इसके विपरीत आचरण करने से उसका द्विजत्व समाप्त हो जाता है -

नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम।
स शूद्रवद्बहिष्कार्यः सर्वस्माद् द्विजकर्मणः।।
प्रभात बेला को आर्ष साहित्य में ब्रह्मवेला कहा गया है - "ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत" (मनुस्मृति) इसलिए कवि ने यहाँ उसे 'पुण्यमय' कहा है। इन्हीं सब तथ्यों को सोचकर देर से उठने पर प्रातःकृत्य न कर पाने के कारण ब्रह्मचारी बालक पश्चाताप कर रहा है। इति

Scanned with CamScanner